श्रीः ।

महिम्नःस्तोत्रम् ।

सुबोधिनीव्याख्यासहितम् ।

ॐ नमः शिवाय ।

महिम्नः पारं ते परमविदुषो यद्यसदृशी
स्तुतिर्ब्रह्मादीनामपि तदवसन्नास्त्वयि गिरः ॥
अथाऽवाच्यः सर्वः स्वमतिपरिणामावधि गृण-
न्ममाप्येष स्तोत्रे हर निरपवादः परिकरः ॥ १ ॥

हे परम भगवन्, ते तव महिम्नः परं पारं अविदुषः अजानतः पुरुषस्य स्तुतिर्वादः यदि असदृशी स्यात् अननुरूपा अयोग्या भवेत् तर्हि किंचित्रम्। तत्तथा ब्रह्मादीनामपि गिरस्त्वयि विषये अवसन्नाः निष्फलाः भवेयुः तत्तस्मात्कारणान्न केवलमस्माकमेव स्तुतेरनधिकारित्वं किंतु ब्रह्मादीनामपि तथैव स्यादित्यर्थः । सर्वेषामेवानेन पूर्वार्धेन स्तुतेरनधिकारित्वं प्रतिपादितम् । उत्तरार्धेन साधिकारित्वं प्रतिपादयन्नाह । हे भगवन्, यतः सर्वः समस्तोपि जनः स्वमतिपरिणामावधि स्वकीया मतिः स्वमतिः तस्याः परिणामः परिपाकः सोऽवधिः सीमा मर्यादा यत्र स्वमतिपरिणामावधि यथा भवति एवं गृणन् स्तुवन् अवाच्योऽनुग्राह्यो भवति निर्दोष

एव । यदेवं तर्हि हे हर, हे दीनार्तिहर, अस्मिन्स्तोत्रे ममापि- एषः परिकरः प्रारंभो निरपवादो निर्दोष एवेत्यर्थः ॥ १ ॥

अतीतः पंथानं तव च महिमा वाङ्मनसयो-
रतद्व्यावृत्त्या यं चकितमभिधत्ते श्रुतिरपि ॥
स कस्य स्तोतव्यः कतिविधगुणः कस्य विषयः
पदे त्वर्वाचीने पतति न मनः कस्य न वचः ॥ २॥

हे भगवन् यस्तव महिमा वाङ्मनसयोः पंथानं अतीत एव लंघितवान्, मार्गमतिक्रांतः । वाक्‌ मनश्च वाङ्मनसी तयोर्वाङ्मनसयोः एते च किल वाङ्मनसी सर्वार्थविषयिणी ताभ्यामपि तव महिमा अवधारयितुं परिज्ञातुं न शक्यते न प्रत्यक्षेण अनुमानेन च गृह्यते । स कः । यं तव महिमानं श्रुतिरपि वेदोपि चकितं अभिधत्ते भीतंभीतं ब्रूते न निश्चयतः । कया अतद्व्यावृत्त्या न तत् अतत् अतद्रूपा चासौ व्यावृतिश्च तया अतद्व्यावृत्त्या । स इत्थंभूतो महिमा कस्य स्तोतव्यः अपि तु न कस्यापीत्यर्थः । तथा कतिविधगुणः तस्य भगवतः कियंतो गुणाः तत्परिज्ञातुं न शक्यते । कस्य विषयः कस्य गोचरो भवेदपि तु न कस्यापीत्यर्थः । एतेन निष्कलस्वरूपे स्तुतेरनधिकारित्वं प्रतिपादितम् । सकले तु सावकाशत्वमस्तीति प्रतिपादयन्नाह। पुनः अर्वाचीने सृष्टिस्थितिप्रलयमुख्यतयाऽऽत्मन्यनुग्राहके पदे स्थाने तु कस्य मनः न पतति वचो वाक् कस्य न प्रसरति अपि तु सर्वेषामपि मनो वचश्च प्रसरत्येवेत्यर्थः॥ २॥

मधुस्फीता वाचः परमममृतं निर्मितवत-
स्तव ब्रह्मन्किं वागपि सुरगुरोर्विस्मयपदम् ॥
मम त्वेतां वाणीं गुणकथनपुण्येन भवतः
पुनामीत्यर्थेऽस्मिन्पुरमथन बुद्धिर्व्यवसिता ॥३॥

भगवतः अशेषशास्त्रकर्तृत्वप्रतिपादनाय आत्मनश्चौद्धत्यपरिहाराय स्तुवन्नाह। हे ब्रह्मन् हे भगवन् मम स्तुत्या तव तुष्टिर्नास्त्येव ।किं कुर्वतस्तव वाचो गिरो विनिर्मितवतः सृष्टवतः। कथंभूताः वाचः । मधुस्फीताः मधुवत् स्फीताः कोमलाः माधुर्यगुणयुक्ताः सालंकारा इत्यर्थः । पुनः कथंभूताः । परमं अमृतं परमामृतस्वरूपास्तथोच्यंते उपचाराद्वेदांतसिद्धांतनिष्ठाः । एतेन किमुक्तम् । एवंविधाः स्वर्गापवर्गयोर्निष्ठा वाचो गिरो निर्मितवतः सुरगुरोरपि वाक् किंविस्मयपदं न भवति आश्चर्यस्थानं न भवति अपि तु भवतीत्यर्थः । किं पुनरस्मदादेः। अहो यद्येवं तर्हि किमर्थं स्तुतौ प्रवर्तसे । सत्यं । तु पुनः हे पुरमथन त्रिपुरदहन, अस्मिंस्तुतिलक्षणेऽर्थे मम बुद्धिरिति हेतोः व्यवसिता कृतोद्यमा । इति किं । अहं भगवतो गुणकथनपुण्येन एतां आत्मीयां वाणीं पुनामि । पवित्रीकरोमीत्यर्थः ॥ ३ ॥

तवैश्वर्यं यत्तज्जगदुदयरक्षाप्रलयकृ-
त्त्रयीवस्तु व्यस्तं तिसृषु गुणभिन्नासु तनुषु ॥
अभव्यानामस्मिन्वरद रमणीयामरमणीं
विहंतुं व्याक्रोशीं विदधत इहैके जडधियः॥४॥

आत्मनः स्तुतेः सावकाशत्वं अव्यभिचारित्वं च प्रति-

पाद्य इदानीं सर्वज्ञत्वं सर्वकर्तृत्वं प्रति केचिद्विप्रतिपद्यंते मीमांसकादयस्तन्मतनिराकरणायानवद्यप्रमाणेनोपन्यासपरेण श्लोकत्रयेण भगवंतं स्तुवन्नाह । हे वरद हे भगवन्, यत्तवैश्वर्यं तद्यस्तं निक्षिप्तं आरोपितम् । कासु तिसृषु तनुषु । कथंभूतासु गुणभिन्नासु गुणाः सत्त्वरजस्तमांसि तैर्भिन्नाः पृथग्भूताः गुणभिन्नास्तासु । कथंभूतं तवैश्वर्यं जगदुदयरक्षाप्रलयकृत् त्रयाणां जगतां उदयः उत्पत्तिः रक्षा परिपालनं प्रलयो विनाशश्चेति भगवतस्तवैश्वर्यं करोति । पुनः कथंभूतं त्रयीवस्तु त्रयीशब्देन वेदत्रयी अथवा ब्रह्मविष्णुरुद्रात्मकं रूपम् । हे भगवन्, इह मर्त्यलोके एके जडधियो मंदमतयः पापिष्ठा मीमांसकादयस्तवैश्वर्यं निहंतुं स्फोटयितुं निराकर्तुं व्याक्रोशीं निंदां विदधते कुर्वंति । कथंभूतां व्याक्रोशीं अभव्यानां पापिष्ठानां रमणीयां मनोरमां । पुनः कथंभूतां अस्मिन्सर्वज्ञत्वादिगुणोपेते तवैश्वर्ये शुद्धमतीनां पंडितानां अरमणीं अमनोरमाम् ॥ ४ ॥

किमीहः किंकायः स खलु किमुपायस्त्रिभुवनं
किमधारो धाता सृजति किमुपादान इति च ।
अतर्क्यैश्वर्ये त्वय्यनवसरदुस्थो हतधियः
कुतर्कोऽयं कांश्चिन्मुखरयति मोहाय जगतः ॥ ५ ॥

इदानीं तामेव व्याक्रोशीं प्रकटयन्नाह । खल्विति निश्चितं स धाता स कर्ता त्रिभुवनं सृजति त्रिभुवनजनने का ईहा का चेष्टा का परिस्पंदक्रिया । तथा किंकायः सन् त्रिभुवनं सृजति । तथा किमुपायः सन् धाता त्रिभुवनं सृजति ।

किमुपादानं किंकारणं किंनिमित्तं च । अयमतिकुतर्कः कांश्चिद्धतधियो मंदमतीन् मुखरयति वाचालयति । किमर्थं जगतो मोहाय लोकप्रतारणाय नरकगमनाय । कथंभूतः कुतर्कः त्वयि विषये अनवसरदुःस्थः अवसरः अवकाशः न अवसरः अनवसरस्तेन दुःस्थः दुर्बलस्तुच्छ इत्यर्थः। कथंभूते त्वयि अतर्क्यैश्वर्ये अचिंत्यमहत्वे । उक्तं हि । इच्छया कुरुते देहमिच्छया वितनुर्भवेत् । क्रीडते भगवान् लोके बालः क्रीडनकैरिव ॥५॥

अजन्मानो लोकाः किमवयववंतोपि जगता-
मधिष्ठातारं किं भवविधिरनादृत्य भवति ॥
अनीशो वा कुर्याद्भुवनजनने कः परिकरो
यतो मंदास्त्वां प्रत्यमरवर संशेरत इमे ॥ ६ ॥

हे भगवन्, अमी भूर्भुवःस्वःप्रभृतयः सप्तलोकाः अवयववंतोपि किं अजन्मानः एषां जन्म न विद्यते । यद्यत्सावयवं तत्तज्जन्मयुक्तं यथा घटः तथा लोकाः सावयवाः सावयवत्वाज्जन्मवंत एव। हे भगवन् भवविधिः सृष्टिविधानं जगतां अधिष्ठातारं चेतनं निमित्तकारणमीश्वरं अनादृत्य भवति किं अनपेक्ष्य भवति । नैव कर्तारमपक्षते । एवं दिक्कालधर्माधर्मपरमाणुप्रभृतीनि चेतनाधिष्ठानस्वीकृतानि स्वकार्योत्पत्तौ प्रवर्तंते । यच्चेतनशून्यानि तच्चेतनाधिष्ठानस्वीकृतकार्योत्पत्तौ प्रवर्तंते । अथवाभिधीयते यदि अनीशः कुर्यात्तन्महैश्वर्यबहिर्भूतः कश्चित्कुर्यात् तदाऽस्य अनीशस्य भुवनजनने भुवनोत्पादनविधौ कः परिकरः का सामग्री । हे अमरवर यतः कारणादिमे

मंदाः पापिष्ठाः मीमांसकादयः त्वां प्रतिसंशेरते संदेहं कुर्वंति । संप्रति संदेहो नास्तीति तात्पर्यार्थः । ईश्वरं विना नान्यः समर्थ इत्यर्थः ॥ ६ ॥

त्रयी सांख्यं योगः पशुपतिमतं वैष्णवमिति
प्रभिन्ने प्रस्थाने परमिदमदः पथ्यमिति च ॥
रुचीनां वैचित्र्यादृजुकुटिलनानापथजुषां
नृणामेको गम्यस्त्वमसि पयसामर्णव इव ॥७॥

त्रयी वेदविहितो मार्गः सांख्यं कापिलं शास्त्रं पंचविंशतितत्त्वोपलक्षितं वा । तथा योगसंबंधः योगः पातंजलात् साधनत्वात् न्यायशास्त्रं वैशेषिकशास्त्रं तथा पशुपतिमतं शैवागममतेन सिद्धांतः एको मार्गः। तथा वैष्णवं नारदपंचरात्रागममतेन सिद्धांत एको मार्गः । इत्यनेन प्रकारेण प्रस्थाने मार्गे प्रभिन्ने नानात्वं गते सति अहंकारोपेतास्तदनुष्ठायिनः इति ब्रुवते । इदं परं तत्त्वं नास्मात्परमस्तीति अदः पथ्यं सेव्यं ग्राह्यं च तस्मात्सेवनीयमस्ति इत्येवंप्रकारेण रुचीनां इच्छानां वैचित्र्यात् भिन्नत्वात् अतो रुचयो विचित्राः । यदुक्तं । एकमेव परं तत्त्वमभिन्नं परमार्थतः । तदेव रुचिवैचित्र्यान्नानात्वं समुपागतम् । हे भगवन् ऋजुकुटिलनानापथजुषां त्वमेवैकः गम्योसि । केषां क इव पयसां अर्णवः समुद्रो यथा गम्यस्तथात्वम् ॥७॥

महोक्षः खट्वांगं परशुरजिनं भस्म फणिनः
कपालं चेतीयत्तव वरद तंत्रोपकरणम् ॥

सुरास्तां तामृद्धिं विदधति तु भवद्भ्रूप्रणिहितां
नहि स्वात्मारामं विषयमृगतृष्णा भ्रमयति ॥८॥

अहो हे वरद, तव इयत् इदं तंत्रोपकरणं तंत्ररूपेण प्रपंचरूपेण स्थितमुपकरणमुपकारकमित्यर्थः । महांश्चासावुक्षा वृषभश्चेति महोक्षः खट्वांगं प्रसिद्धं दंडस्योपरि ब्रह्मकपाले खट्वांगमुच्यते । तथा परशुरायुधविशेषः । अजिनं गजचर्म तथा भस्म दग्धगोमयं फणिनः काद्रवेया नागाः तथा कपालं शिरोस्थि च इतिशब्दः समाप्तौ सुराः इंद्रादयो देवाः भवद्भ्रूप्रणिहितां भ्रूक्षेपमात्रेण नितरां दत्तामित्यर्थः । ऋद्धिं संपदं विदधति धारयंति । अहो यद्येवं तर्हि कथं स्वयं न भुंक्ते नचैवं वाच्यं हि यस्मात् विषयमृगतृष्णा स्वात्मारामं पुरुषं योगिनं न भ्रमयति न चालयति । एतेन भगवतः परमयोगित्वं प्रकटितम् ॥ ८ ॥

ध्रुवं कश्चित्सर्वं सकलमपरस्त्वध्रुवमिदं
परो ध्रौव्याध्रौव्ये जगति गदति व्यस्तविषये ॥
समस्तेऽप्येतस्मिन्पुरमथन तैर्विस्मित इव
स्तुवञ्जिह्रेमि त्वां न खलु ननु धृष्टा मुखरता॥९॥

हे पुरमथन त्रिपुरदाहक, कश्चित्तद्दर्शनानुयायि सर्वमिदं जगत् ध्रुवं नित्यं गदति न कदाचिदनीदृशं जगदिति अविनश्वरं कथयति । अथ अपरो बौद्धः सकलं जगदिदं अध्रुवं क्षणिकं गदति । परस्ततोन्यः वीतरागी मध्यस्थः एतस्मिन्समस्तेऽपि जगति ध्रौव्याध्रौव्ये नित्यानित्यत्वे व्यस्तविषये निक्षिप्तप्रमाणे वदति आकाशादिपंचकं नित्यं [illegible]

इत्यर्थः । एवं नानाप्रकारेण तैर्वादिभिर्विस्मित इव मोहं प्राप्त इवाहं त्वां स्तुवन् जिह्रेमि लज्जे । अहो यद्येवं तर्हि किमर्थं स्तुतौ प्रवर्तसे तत्राह । ननु अहो खलु निश्चयेन मुखरता वाचालता न धृष्टा । अपि तु धृष्टैवेत्यर्थः ॥ ९ ॥

तवैश्वर्यं यत्नाद्यदुपरि विरिंचो हरिरधः
परिच्छेत्तुं यातावनलमनलस्कंधवपुषः ॥
ततो भक्तिश्रद्धाभरगुरुगृणद्भ्यां गिरिश य-
त्स्वयं तस्थे ताभ्यां तव किमनुवृत्तिर्न फलति॥१०

हे भगवन्, विरिंचो ब्रह्मा उपरितनपक्षे हरिः कृष्णः अधःपक्षे तवैश्वर्यं यत्नात्परिच्छेत्तुं एतावद्धीति निश्चेतुं अनलं यातौ असमर्थौ भूतौ । कथंभूतस्य तव अनलस्कंधवपुषः अनलस्कंधोऽग्निसमूहो वपुः शरीरं यस्य तव । क्वचिदनिलस्कंधवपुष इति पाठस्तत्र वायुशरीरस्य । एतेन किमुक्तं वायुतत्त्वपर्यंतं लिंगस्य मस्तकं कालाग्निपर्यंतं लिंगस्य मूलं ब्रह्मा ब्रह्मांडव्यापी विष्णुर्भगवान् अप्तत्त्वनिवासी कथमेतौ तवैश्वर्यं परिज्ञातुं समर्थौ स्यातामिति । अपि तु न भवत इत्यर्थः । ततोनंतरं ताभ्यां ब्रह्मविष्णुभ्यां तवैश्वर्यं स्वयं तस्थे स्वेनैव प्रकाशितमित्यर्थः । आत्मानं आत्मनैव प्रकटयामास । किंकुर्वद्भ्यां ताभ्यां भक्तिश्रद्धाभरगुरुगृणद्भ्यां भक्तिर्भजनं श्रद्धा विश्वासस्तयोर्भरेण महत्त्वेन गुरु यथा भवति एवं गृणद्भ्याम् । ताभ्यामित्यत्र तादर्थ्ये चतुर्थी । यद्यस्मात्कारणात् हे गिरिश, तव अनुवृत्तिः सेवा किं न फलति अपि तु फलत्येवेत्यर्थः ॥ १० ॥

अयत्नादापाद्य त्रिभुवनमवैरव्यतिकरं
दशास्यो यद्बाहूनभृत रणकंडूपरवशान् ॥
शिरःपद्मश्रेणीरचितचरणांभोरुहबलेः
स्थिरायास्त्वद्भक्तेस्त्रिपुरहर विस्फूर्जितमिदम् ११

हे त्रिपुरहर, दशास्यो रावणोऽयत्नादनायासेन त्रिभुवनं त्रिलोकं अवैरव्यतिकरं शत्रुसंपर्करहितं आपाद्य संपाद्य कृत्वा रणकंडूपरवशान् रणे कंडूः खर्जूः तया परवशान् तदधीनान् युद्धलंपटान् बाहून् अभृत धृतवान् इति यत् तदिदं स्थिरायास्त्वद्भक्तेर्विस्फूर्जितं विलसितं । कथंभूतायास्त्वद्भक्तेः शिरःपद्मश्रेणीरचितचरणांभोरुहबलेः शिरांस्येव यानि पद्मानि तेषां श्रेणी पंक्तिः तया रचिता निर्मिता चरणांभोरुहयोः पादपद्मयोः बलिः पूजोपहारो यस्यां तस्याः त्वयि भक्तेः फलं निरूपितम् ॥ ११ ॥

अमुष्य त्वत्सेवासमधिगतसारं भुजवनं
बलात्कैलासेपि त्वदधिवसतौ विक्रमयतः ॥
अलभ्या पातालेप्यलसचलितांगुष्ठशिरसि
प्रतिष्ठा त्वय्यासीद्ध्रुवमुपचितो मुह्यति खलः १२

इदानीं त्वयि तिरस्कारफलं निरूपयितुमाह । अमुष्य रावणस्य पाताले रसातलेऽपि प्रतिष्ठा स्थितिः अलभ्या दुर्लभा आसीत् । किंभूतस्य भुजवनं भुजसमूहं बलात् शक्त्या त्वदधिवसतौ तव निवासस्थाने कैलासे विक्रमयतः । किंभूतं भुजवनं त्वत्सेवासमधिगतसारं त्वत्सेवया भवदाराधनेन समधिगतः प्राप्तः सारो बलं येन तत्तथोक्तं । कस्मिन् सति त्वयि अलसच-

लितांगुष्ठशिरसि सति अलसेन अनायासेन अप्रयत्नेन चलितं अधःकृतं अंगुष्ठशिरो येन सोऽलसचलितांगुष्ठशिरास्तस्मिन् सति । अहो युक्तमेतत् । ध्रुवं निश्चितं उपचितः परया लक्ष्म्या संपन्नः समृद्धः खलो दुर्जनः मुह्यति मोहमुपगच्छति ॥१२॥

यदृद्धिं सुत्राम्णो वरद परमोच्चैरपि सती-
मधश्चक्रे बाणः परिजनविधेयत्रिभुवनः ॥
न तच्चित्रं तस्मिन्वरिवसितरि त्वच्चरणयो-
र्न कस्या उन्नत्यै भवति शिरसस्त्वय्यवनतिः १३

इदानीं बाणासुरानुग्राहिणं भवं स्तुवन्नाह । बाणो बाणासुरः सुत्राम्णो वासवस्य ऋद्धिं संपदं सुरेंद्रत्वं अधश्चक्रे । कथंभूतां ऋद्धिं परमोच्चैरपि सतीमत्यंतमहतीमपि । हे भगवन् युक्तमेतत् तस्मिन्बाणे तच्चित्रमाश्चर्यं न भवति । कथंभूतो बाणः । परिजनविधेयत्रिभुवनः परिजनस्येव सेवकस्येव विधेयं वश्यं त्रिभुवनं यस्य स तथोक्तः । कथंभूते तस्मिन्, तव चरणयोर्वरिवसितरि तव शुश्रूषके युक्तमेतदित्याह । हे वरद, त्वयि शिरसः अवनतिः प्रणामः कस्यै उन्नत्यै न भवति अपि तु सर्वेषामेव ऐश्वर्यदात्री भवतीति तात्पर्यार्थः ॥ १३ ॥

अकांडब्रह्मांडक्षयचकितदेवासुरकृपा-
विधेयस्यासीद्यस्त्रिनयन विषं संहृतवतः ॥
स कल्माषः कंठे तव न कुरुते न श्रियमहो
विकारोऽपि श्लाघ्यो भुवनभयभंगव्यसनिनः१४

हे त्रिनयन, विषं कालकूटं संहृतवतः गिलितवतस्तव कंठे गले यः कल्माषः कृष्णपांडुरो वर्ण आसीत् स श्रियं शोभां नु इति वितर्के न कुरुते अपितु करोत्येव। कथंभूतस्य तव । अकांडब्रह्मांडक्षयचकितदेवासुरकृपाविधेयस्य अकांडे अप्रस्तावे ब्रह्मांडक्षयेन जगत्प्रलयेन चकिताः ये देवासुरास्तेषु कृपा विधेया यस्य तत् कृपापरस्य । ननु शुद्धस्फटिकसंकाशे नीलत्वलक्षणविकारः कथं शोभां कुरुत इत्याह। अहो युक्तमेतत् । भुवनभयभंगव्यसनिनः पुरुषस्य विकारोपि श्लाघ्यः ॥ १४ ॥

असिद्धार्था नैव क्वचिदपि सदेवासुरनरे
निवर्तंते नित्यं जगति जयिनो यस्य विशिखाः॥
स पश्यन्नीश त्वामितरसुरसाधारणमभू-
त्स्मरः स्मर्तव्यात्मा नहि वशिषु पथ्यः परिभवः॥१५

हे भगवन्,यस्य स्मरस्य विशिखाः बाणाः सदेवासुरनरे देवाश्च असुराश्च नराश्च तैः सहवर्तत इति सदेवासुरनरं तस्मिञ्जगति लोके स्वर्गमृत्युपातालेऽपीत्यर्थः । असिद्धार्थाः अकृतकार्याः क्वचिदपि नैव निवर्तंते किंतु कृतकार्या भवंतीत्यर्थः । किंभूतस्य स्मरस्य। नित्यं जयिनः जयशीलस्य। हे ईश, स स्मरस्त्वामितरसुरसाधारणं अन्यदेवतुल्यं पश्यन् स्मर्तव्यात्मा अभूत् स्मरणीयशरीरो बभूव तथा न दृष्ट इत्यर्थः। कथंभूता विशिखाः जयिनो जययुक्ताः। हि युक्तमेतत् वशिषु जितेंद्रियेषु परिभवोऽनादरः न पथ्यः न सुखकारी इत्यर्थः ॥ १५ ॥

महीपादाघाताद्व्रजति सहसा संशयपदं
पदं विष्णोर्भ्राम्यद्भुजपरिघरुग्णग्रहगणम् ॥
मुहुर्द्यौर्दौस्थ्यं यात्यनिभृतजटाताडिततटा
जगद्रक्षायै त्वं नटसि ननु वामैव विभुता॥१६॥

हे भगवन् ,त्वं जगद्रक्षायै जगतां रक्षणाय रक्षसां प्रतारणाय च नटसि नृत्यसि तांडवं करोषि । मही पृथ्वी पादाघातात्पादताडनात् चरणविन्यासात् सहसा शीघ्रं किमुत्पद्यति किमधः प्रविशतीति संशयपदं व्रजति । अस्ति नास्तीति संदेहं गच्छतीत्यर्थः । तथा विष्णोः । पदमाकाशं भ्राम्यद्भुजपरिघरुग्णग्रहगणमभूत् भ्राम्यद्भिर्भुजरूपपरिघैः भुजस्थैः परिघैर्वा रुग्णो भुग्नो ग्रहगणः सोमपात्रसमूहो यत्र तत्तथा । यागादिशुभकर्माणि यदा ध्वंस्यंत इत्यर्थः । भ्राम्यद्भुजप्रहारेण भुग्नो ग्रहगणसमूहो वर्तते । तथा द्यौः स्वर्गः मुहुः वारंवारं दौस्थ्यं याति । कथंभूता द्यौः अनिभृतजटाताडिततटा अनिभृता असंवृता याः जटास्ताभिस्ताडितं तटं प्रांतदेशो यस्याः सा तथोक्ता । ननु अहो युक्तमेतत् । यतो विभोः विभुता प्रभुता वामैव । वैपरीत्यं विभुत्वं क्वचिद्भवतीत्यर्थः ॥ १६ ॥

वियद्व्यापी तारागणगुणितफेनोद्गमरुचिः
प्रवाहो वारां यः पृषतलघुदृष्टः शिरसि ते ॥
जगद्द्वीपाकारं जलधिवलयं तेन कृतमि-
त्यनेनैवोन्नेयं धृतमहिम दिव्यं तव वपुः॥१७॥

वियद्व्यापीति । हे भगवन्, वारां तोयानां प्रवाह ओघः

यः ते तव शिरसि पृषतलघुदृष्टः जलकणिकावत्सूक्ष्मो दृष्टः । कथंभूतः वियद्व्यापी व्योमवत् व्यापनशीलः । पुनः किंभूतः । तारागणगुणितफेनोद्गमरुचिः तारा: नक्षत्राणि तेषां गणः समूहस्तेन गुणिता उपमिलिता शंकितेति यावत् । फेनोद्गमस्य डिंडीरोत्पत्तेः रुचिः शोभा यस्य स तेन प्रवाहेण जगत् द्वीपाकारं कृतं जलमध्यस्थितो भूखंडो द्वीपः तद्रूपमकारि । किंविधं । जलधिवलयं जलधिः समुद्रो वलयः परिखा यस्य तत् । अनेनैव हेतुना तव दिव्यं सदानंदात्मकं वपुः शरीरं धृतमहिमेत्युन्नेयं ऊहनीयं । धृतो भृतो महिमा सर्वज्ञत्वं सर्वकर्तृत्वं च येन तत् ॥ १७ ॥

रथः क्षोणी यंता शतधृतिरगेंद्रो धनुरथो
रथांगे चंद्रार्कौ रथचरणपाणिः शर इति ॥
दिधक्षोस्ते कोऽयं त्रिपुरतृणमाडंबरविधि-
र्विधेयैः क्रीडंत्यो न खलु परतंत्राः प्रभुधियः १८

रथ इति । हे देव, त्रिपुरतृणं दिधक्षोर्दग्धुमिच्छोस्ते तव कोऽयं आडंबरविधिः कोऽयं संभ्रमः । अयं संभ्रमः किमर्थमिति यावत् । तमेवाडंबरं दर्शयितुमाह । रथः क्षोणी भूमिः यंता सारथिः शतधृतिः ब्रह्मा अगेंद्रो हिमवान् धनुः अथो अनंतरं रथांगे रथचक्रे चंद्रार्कौ सोमसूर्यौ रथचरणपाणिः विष्णुः शरो बाणः।इतिशब्दः प्रकारवचने अर्थवान् ।युक्तमेवैतत् । प्रभुधियः स्वामिनां बुद्धयः परतंत्राः न खलु फलप्रधानाः न भवंति । यावत्फलं सिध्यति तावदेव संपादयतीत्यर्थः ।

किंविधाः प्रभुधियः । विधेयैर्भृत्यैर्जनैः सह क्रीडंत्यो विनोदयंत्यः । त्रिपुर एव तृणं त्रिपुरतृणम् ॥ १८ ॥

हरिस्ते साहस्रं कमलबलिमाधाय पदयो-
र्यदेकोने तस्मिन्निजमुदहरन्नेत्रकमलम् ॥
गतो भक्त्युद्रेकः परिणतिमसौ चक्रवपुषा
त्रयाणां रक्षायै त्रिपुरहर जागर्ति जगतां ॥ १९ ॥

हे त्रिपुरहर, हरिर्नारायणस्ते तव पदयोश्चरणयोः साहस्रं सहस्रसंख्योपेतं कमलबलिं आधाय निक्षिप्य तस्मिन् बलौ एकोने एकेन कमलेन हीने सति निजं आत्मीयं यन्नेत्रकमलं कमलाकारं नेत्रं उदहरदुद्धृतवान् । असौ भक्त्युद्रेकः भक्त्यतिशयः चक्रवपुषा चक्ररूपेण परिणतिं परिणामं गतः प्राप्तः सन् त्रयाणां जगतां स्वर्गमर्त्यपातालानां रक्षायै त्राणाय जागर्ति । प्रबुद्धोऽप्रमत्तस्तिष्ठतीत्यर्थः ॥ १९ ॥

क्रतौ सुप्ते जाग्रत्त्वमसि फलयोगे क्रतुमतां
क्व कर्म प्रध्वस्तं फलति पुरुषाराधनमृते ॥
अतस्त्वां संप्रेक्ष्य क्रतुषु फलदानप्रतिभुवं
श्रुतौ श्रद्धां बध्वा दृढपरिकरः कर्मसु जनः २०

हे भगवन्, जनो लोकः अतः कारणात् कर्मसु योगेषु विषये दृढपरिकरो दृढारंभः कृतप्रयत्नो वर्तते । किं कृत्वा, श्रुतौ वेदवाक्ये श्रद्धां बध्वा विश्वासं कृत्वा । पुनः किं कृत्वा । त्वां क्रतुषु यज्ञेषु फलदानप्रतिभुवं फलप्रदातारं संप्रेक्ष्य विचार्य क्रतौ यागे सुप्ते विनष्टे सति फलयोगे स्वर्गादि-फलसंबंधे त्वं जाग्रदसि फलदानाय त्वं सावधानोऽसि ।

कथमेतदित्याह। क्रतुमतां यज्वनां पुरुषाणां प्रध्वस्तं कर्म पुरुषाराधनमृते ईश्वराराधनं विना क्व फलति, न कुत्रापि फलतीत्यर्थः ॥ २० ॥

क्रियादक्षो दक्षः क्रतुपतिरधीशस्तनुभृता-
मृषीणामार्त्विज्यं शरणद सदस्याः सुरगणाः ॥
क्रतुभ्रंशस्त्वत्तः क्रतुषु फलदानव्यसनिनो
ध्रुवं कर्तुः श्रद्धाविधुरमभिचाराय हि मखाः २१

हे शरणद हे अभयप्रद, दक्षो दक्षप्रजापतिः क्रियादक्षः क्रियासु यज्ञक्रियासु दक्षः कुशलः क्रतुपतिर्यजमानः तथा तनुभृतां शरीरिणामधीशः अधिपतिः प्रजापतित्वात् यथा ऋषीणामार्त्विज्यं ऋषयो वसिष्ठादय एव ऋत्विज इत्यर्थः। तथा सुरगणा देवसमूहाः सदस्याः सभ्याः। एवंविधसामग्रीकस्य दक्षस्य त्वत्तः सकाशात् क्रतुभ्रंशः यागविनाशो बभूव। कथंभूतात् त्वत्तः। क्रतुषु यागेषु फलदाने फलसंपादने व्यसनिन उत्सुकात्। त्वद्विमुखस्य दक्षस्येप्सितफलप्राप्तिर्न संजातेति युक्तमेतत्। ध्रुवं निश्चितं कर्तुर्यजमानस्य मखाः यागाः श्रद्धाविधुरं विश्वासरहितं यथा भवति तथा अभिचाराय विपरीतार्थाय भवंति ॥ २१ ॥

प्रजानाथं नाथ प्रसभमभिकं स्वां दुहितरं
गतं रोहिद्भूतां रिरमयिषुमृष्यस्य वपुषा ॥
धनुष्पाणेर्यातं दिवमपि सपत्राकृतममुं
त्रसंतं तेऽद्यापि त्यजति न मृगव्याधरभसः २२

प्रजानाथमिति । नाथेत्यादिना आखेटवृत्तिं दर्शयति । हे नाथ हे स्वामिन्, तव मृगव्याधरभसः आखेटकोत्साहः अमुं प्रजानाथं ब्रह्माणं अद्यापि न त्यजति । कथंभूतस्य ते तव धनुष्पाणेः । कथंभूतं प्रजानाथं । प्रसभं बलात्कारेण रोहिद्भूतां मृगीजातां स्वां दुहितरं प्रति ऋष्यस्य वपुषा मृगस्य शरीरेण गतम् । किं कर्तुमिच्छुं । रिरमयिषुं रमणं कर्तुमिच्छुं । पुनः कथंभूतं । अभिकं कामुकम् । पुनः कथंभूतं । सपत्राकृतं तव बाणाभिघातव्यथितं सपत्रं शरमस्य शरीरे प्रवेशितमित्यर्थः । अपरं कथंभूतम् । त्रसंतं भीतं चकितमिति यावत् । अत एव दिवमपि यातं गतम् । ब्रह्माऽतिकामुकत्वेन मृगीभूतां स्वसुतां मृगरूपेण रंतुं गतः । अतः अधर्माणमेनं शरेण हंतुमीश्वरो मृगयुर्भूत्वाऽद्यापि अनुयातीत्यर्थः ॥ २२ ॥

स्वलावण्याशंसा धृतधनुषमह्नाय तृणव-
त्पुरः प्लुष्टं दृष्ट्वा पुरमथन पुष्पायुधमपि ॥
यदि स्त्रैणं देवी यमनिरतदेहार्धघटना-
दवैति त्वामद्धा बत वरद मुग्धा युवतयः ॥२३॥

स्वलावण्येति । हे पुरमथन हे त्रिपुरदहन, अह्नाय शीघ्रं तृणवत् प्लुष्टं दग्धं धृतधनुषं गृहीतचापं पुष्पायुधं मदनं पुरो अग्रतो दृष्ट्वापि देवी गौरी यमनिरतदेहार्धघटनात् शरीरार्धयोजनात् त्वां यदि स्त्रैणं स्त्रीलंपटं अवैति जानाति । तर्हि हे वरद, बत इति खेदे । अद्धा निश्चितं युवतयः स्त्रियो

मुग्धा अज्ञाः । किंभूता गौरी । स्वलावण्याशंसा आत्मसौंदर्यं कीर्तयंती । स्वकीयरूपाभिमानिनीत्यर्थः ॥ २३ ॥

श्मशानेष्वाक्रीडा स्मरहर पिशाचाः सहचरा-
श्चिताभस्मालेपः स्रगपि नृकरोटीपरिकरा ॥
अमंगल्यं शीलं तव भवतु नामैवमखिलं
तथापि स्मर्तॄणां वरद परमं मंगलमसि ॥ २४ ॥

श्मशानेष्विति । हे स्मरहर, तव स्मशानेषु पितृकाननेषु आसमंतात् क्रीडा विहरणं तथा पिशाचाः सहचराः सहवासिनः तथा चिताभस्मालेपः मृतशरीरदहनाय दग्धकाष्ठनिचयश्चिता तत्र भस्म भसितं तस्य आलेपः अनुलेपनं अंगराग इति यावत् । तथा स्रगपि मालापि नृकरोटीपरिकरः नृकपालसमूहः । नाम इति संबोधने । हे वरद, एवं पूर्वोक्तप्रकारेण तव अखिलं समग्रं शीलं स्वभावः अमंगल्यं अशुभं भवतु । पुनस्तथापि स्मर्तॄणां चिंतकानां भक्तानां त्वं परममुत्कृष्टं मंगलमसि ॥ २४ ॥

मनः प्रत्यक्चित्ते सविधमवधायात्तमरुतः
प्रहृष्यद्रोमाणः प्रमदसलिलोत्संगितदृशः ॥
यदालोक्याह्लादं ह्रद इव निमज्ज्यामृतमये
दधत्यंतस्तत्त्वं किमपि यमिनस्तत्किल भवान् २५

मन इति । हे भगवन्, यमिनो योगिनः अंतरात्मनि किमपि तत्त्वमालोक्य सच्चिदानंदरूपं प्रत्यक्षगोचरं वस्तु दृष्ट्वा आह्लादं सुखं दधति धारयंति । किंकृत्वेव । अमृतमये अमृतस्वरूपे ह्रदे

वान् त्वमेव । किलशब्दः प्रसिद्धौ । किंकृत्वा । प्रत्यग्विषयेभ्यो निवृत्तं चित्तं तस्मिन् आत्मनि मनोंतःकरणं सविधं सप्रकारं योगशास्त्रोक्तं यथा भवति तथा अवधायावस्थाप्य । किंभूताः यमिनः । आत्तमरुतः आत्ताः गृहीताः मरुतः प्राणादिवायवो यैस्ते । तथा प्रहृष्यद्रोमाणः प्रहृष्यंति पुलकितानि रोमाणि तनूरुहाणि येषां ते तथा । प्रमदसलिलोत्संगितदृशः प्रमदसलिलानि हर्षाश्रूणि तैरुत्संगिता परिप्लुता दृग्दृष्टिर्येषां ते तथोक्ताः ॥ २५ ॥

त्वमर्कस्त्वं सोमस्त्वमसि पवनस्त्वं हुतवह-
स्त्वमापस्त्वं व्योम त्वमु धरणिरात्मा त्वमिति च॥
परिच्छिन्नामेवं त्वयि परिणता बिभ्रतु गिरं
न विद्मस्तत्तत्त्वं वयमिह तु यत्त्वं न भवसि ॥२६॥

त्वमर्क इति । हे भगवन्, त्वं अर्कः सूर्योसि । त्वं सोमः चंद्रोसि । त्वं पवनो वायुरसि । त्वं हुतवहोऽग्निरसि । त्वमापः उदकमसि । त्वं उ इति वितर्के धरणिर्भूरसि । त्वमात्मा सर्वसाक्षी परमात्मासि । इति च इतिशब्दः समाप्तौ वर्तते । हे देवाधिदेव, परिणताः परिपक्वमतयस्त्वत्स्वरूपविदस्त्वयि विषये एवं पूर्वोक्तप्रकारेण परिच्छिन्नां इयत्तावधारितां इयत्ताकलितां गिरं वाणीं बिभ्रतु । पुनरिह जगति वयं तत्तत्त्वं न विद्मः । यत्तत्त्वं वस्तु त्वं न भवसि । अतो यत्किंचित् सद्वा असत् तत्सर्वं भवतारको भवान् । भवद्व्यतिरिक्तं किंचिन्नास्तीति तात्पर्यार्थः ॥ २६ ॥

त्रयीं तिस्रो वृत्तीस्त्रिभुवनमथो त्रीनपि सुरा-
नकाराद्यैर्वर्णैस्त्रिभिरभिदधत्तीर्णविकृति ॥
तुरीयं ते धाम ध्वनिभिरवरुंधानमणुभिः
समस्तव्यस्तं त्वां शरणद गृणात्योमिति पदम् २७

हे शरणद, ओमिति पदं त्वां गृणाति स्तौति। कथंभूतं ओमिति पदं । सर्वरूपेण समस्तं व्यापकं खंडरूपेणाक्षरविभागेन व्यस्तं व्याप्यं । पुनः किंभूतम् । अकराद्यैरकारोकारमकारैस्त्रिभिर्वर्णैरेतान्यभिदधत् । एतानि कानि । त्रयीं ऋग्यजुःसामानि तिस्रो वृत्तीः उदात्तानुदात्तस्वरितान् त्रिभुवनं त्रैलोक्यं । अथो अनंतरं त्रीनपि सुरान् ब्रह्मविष्णुरुद्रान् । अकारेण ऋगुदात्तस्वर्गब्रह्माणोऽभिधीयंते । तथा उकारेण सामानुदात्तमर्त्यविष्णवोऽभिधीयंते । तथा मकारेण यजुर्वेदस्वरितपातालरुद्रा अभिधीयंते । पुनः किंविधमोंकारम् । ते तव तुरीयं धाम स्थानम् । तेजो वाऽणुभिरतिसूक्ष्मैर्ध्वनिभिरवरुंधानं व्याप्नुवत् । ते तव तुरीयं धामेति हृदयात्कंठावधिर्यावत् जाग्रदवस्थायाः व्याप्तिः । कंठात् तालुपर्यंतं स्वप्नावस्थायाः व्याप्तिः । तत्तात्वादिललाटपर्यंतं सुषुप्त्यवस्थाया व्याप्तिः । ललाटात् कुंडलिनीं व्याप्य शिवतत्त्वं यावत्तुर्यावस्थायाः व्याप्तिः । तत्रानाहतो नादो मुक्तिदः परिकीर्तितः । कथंभूतं तुरीयं धाम । तीर्णा विकृतिर्येन तत्तथोक्तं । निर्विकारमित्यर्थः ॥ २७ ॥

भवः शर्वो रुद्रः पशुपतिरथोग्रः सह महां-
स्तथा भीमेशानाविति यदभिधानाष्टकमिदम् ॥

अमुष्मिन्प्रत्येकं प्रविचरति देव श्रुतिरपि
प्रियायास्मै धाम्ने प्रणिहितनमस्योऽस्मि भवते२८

भव इति । हे देव, यत् इदं तव भवाद्यभिधानाष्टकं अमुष्मिन्नामाष्टके श्रुतिर्वेदः प्रत्येकं एकमेकं प्रति प्रविचरति। तत्किं अभिधानाष्टकं तदेवाह । भवः शर्वो रुद्रः पशुपतिः अथानंतरं उग्रः सहमहान् । सहमहच्छब्देन महादेव उच्यते । तथा भीमेशानौ इति हेतोः प्रियायास्मै धाम्ने पूर्वश्लोकप्रतिपादिताय तेजोरूपाय भवते तुभ्यं प्रणिहितनमस्योस्मि कृतनमस्कारोस्मि । अथवा हे भव, ते तव प्रियायास्मै धाम्ने तुरीयतेजसे प्रणिहितनमस्योस्मि ॥ २८ ॥

नमो नेदिष्ठाय प्रियदव दविष्ठाय च नमो
नमः क्षोदिष्ठाय स्मरहर महिष्ठाय च नमः ॥
नमो वर्षिष्ठाय त्रिनयन यविष्ठाय च नमो
नमः सर्वस्मै ते तदिदमितिसर्वाय च नमः॥ २९॥

नमो नेदिष्ठायेति । अधिकतमाय शिवाय निकटवर्तिने तुभ्यं नम इत्यर्थः । हे प्रियदव प्रियो दवो वनं यस्य सः प्रियदवः तस्य संबुद्धौ । दविष्ठाय दुस्तराय अतिदूरस्थायेति यावत् । नमः क्षोदिष्ठाय क्षुद्रतराय नमः । हे स्मरहर, महिष्ठाय महत्तमाय नमः । तथा च वर्षिष्ठाय वृद्धतराय नमः । हे त्रिनयन, यविष्ठाय युवतराय तरुणाय च नमः। तथा सर्वस्मै ते नमः । तथा अतिसर्वाय सर्वमतिक्रांताय तुभ्यं तदिदं नमः । अयं नमस्कार इत्यर्थः ॥ २९ ॥

बहलरजसे विश्वोत्पत्तौ भवाय नमो नमः
प्रबलतमसे तत्संहारे हराय नमो नमः ॥
जनसुखकृते सत्वोत्पत्तौ मृडाय नमो नमः
प्रमहसि पदे निस्त्रैगुण्ये शिवाय नमो नमः ॥३०॥

बहलरजस इति । हे भगवन् विश्वोत्पत्तौ जगत्सृष्टौ कर्तव्यतायां बहलरजसे अधिकरजोगुणाय भवाय नमोनमः । तत्संहारे जगन्नाशे प्रबलतमसे अधिकतमोगुणाय हराय नमोनमः। सत्वोत्पत्तौ सत्यां जगत्पालनगुणोद्रेके सति जनसुखकृते जनहितकराय मृडाय नमोनमः । मृड सुख न इत्यस्य धातोः कर्तरि मृडरूपम् । तथा प्रमहसि पदे निस्त्रैगुण्ये प्रकृष्टतेजःपुंजरूपे गुणत्रयातीते मुक्तिस्थाने शिवाय मंगलरूपाय नमोनमः । नमोनम इत्यत्र भक्त्यतिशयेन वीप्सायां द्विर्वचनम् ॥ ३० ॥

कृशपरिणति चेतःक्लेशवश्यं क्व चेदं
क्व च तव गुणसीमोल्लंघिनी शश्वदृद्धिः ॥
इति चकितममंदीकृत्य मां भक्तिराधा-
द्वरद चरणयोस्ते वाक्यपुष्पोपहारम् ॥ ३१ ॥

हे वरद, इदं मदीयं चेतो मानसं क्व । किंभूतं । कृशपरिणति कृशा परिणतिः परिणामो यस्य तत् । स्वप्नविचारगोचरमित्यर्थः । तथा क्लेशवश्यं दुःखपराधीनं । तव ऋद्धिः महिमा क्व । किंभूता ऋद्धिः । शश्वत् सर्वदा गुणसीमोल्लंघिनी गुणमर्यादातिक्रांता अविनाशिनी । इत्यमुना प्रकारेण चकितं भीतं मां ते तव चरणयोर्भक्तिः अमंदीकृत्य भीतिरहितं कृत्वा वाक्यपुष्पोपहारं आधात् वाक्यान्येव पुष्पाणि

तेषां उपहारं पूजामकल्पयत् । क्लेशशब्देन पंचक्लेशास्तानेवाह । अविद्यास्मितारागद्वेषाभिनिवेशास्तेषां वश्यम् । विपरीतज्ञानमविद्या भिन्नयोर्बुद्ध्यात्मनोरेकत्र प्रीतिः अस्मिता सुखेष्वासक्तिः रागः दुःखेष्वप्रीतिः द्वेषः अनुभूतादपि मरणादेस्त्रासोऽभिनिवेश इति क्लेशाः ॥ ३१ ॥

असितगिरिसमं स्यात्कज्जलं सिंधुपात्रे
सुरतरुवरशाखा लेखनी पत्रमुर्वी ॥
लिखति यदि गृहीत्वा शारदा सार्वकालं
तदपि तव गुणानामीश पारं न याति ॥ ३२ ॥

असितेति । हे ईश हे स्वामिन् । असितगिरिसमं नीलगिरितुल्यं कज्जलं अंजनं स्यात् । क सिंधुपात्रे । यदि सुरतरुवरशाखा लेखनी स्यात् । यदि शारदा सरस्वती उर्वीपत्रं गृहीत्वा सार्वकालं लिखति तदपि तव गुणनां पारं अंतं न याति न प्राप्नोति ॥ ३२ ॥

छात्राणां सुखबोधाय नानाटीकानुसारतः ।
इयं कोमलरामेण कृता टीका सुबोधिनी ॥ १ ॥

इति महिम्नस्तोत्रस्य सुबोधिनीटीका समाप्ता ॥

अग्रेसुगमत्वान्मूलमेव लिख्यतेअसुरेत्याद्यारभ्य भूतपतिर्महेश इति समाप्तिपर्यंतम् ॥ ॐनमः शिवाय ॥

असुरसुरमुनींद्रैरर्चितस्येंदुमौले-
र्ग्रथितगुणमहिम्नो निर्गुणस्येश्वरस्य ॥

सकलगुणवरिष्ठः पुष्पदंताभिधानो
रुचिरमलघुवृत्तैः स्तोत्रमेतच्चकार ॥ ३३ ॥

अहरहरनवद्यं धूर्जटेः स्तोत्रमेतत्
पठति परमभक्त्या शुद्धचित्तः पुमान्यः ॥
स भवति शिवलोके रुद्रतुल्यस्तथात्र
प्रचुरतरधनायुःपुत्रवान् कीर्तिमांश्च ॥ ३४ ॥

महेशान्नापरो देवो महिम्नो नापरा स्तुतिः ॥
अघोरान्नापरो मंत्रो नास्ति तत्त्वं गुरोः परम् ३५
दीक्षा दानं तपस्तीर्थं ज्ञानं यागादिकाः क्रियाः ॥
महिम्नस्तवपाठस्य कलां नार्हंति षोडशीम् ॥ ३६ ॥
आसमाप्तमिदं स्तोत्रं पुण्यं गंधर्वभाषितम् ॥
अनौपम्यं मनोहारि शिवमीश्वरवर्णनम् ॥ ३७ ॥

कुसुमदशननामा सर्वगंधर्वराजः
शिशुशशिधरमौलेर्देवदेवस्य दासः ॥
स गुरुंनिजमहिम्नो भ्रष्ट एवास्य रोषा-
त्स्तवनमिदमकार्षीद्दिव्यदिव्यं महिम्नः ॥ ३८ ॥

सुरवरमुनिपूज्यं स्वर्गमोक्षैकहेतुं
पठति यदि मनुष्यः प्रांजलिर्नान्यचेताः ॥
व्रजति शिवसमीपं किन्नरैः स्तूयमानः
स्तवनमिदममोघं पुष्पदंतप्रणीतम् ॥ ३९ ॥

श्रीपुष्पदंतमुखपंकजनिर्गतेन
स्तोत्रेण किल्बिषहरेण हरप्रियेण ॥

कंठस्थितेन पठितेन समाहितेन
सुप्रीणितो भवति भूतपतिर्महेशः ॥ ४० ॥

इत्येषा वाङ्मयी पूजा श्रीमच्छंकरपादयोः ॥
अर्पिता तेन देवेशः प्रीयतां श्रीसदाशिवः ॥ ४१ ॥

॥ इति श्रीपुष्पदंताचार्यविरचितं महिम्नःस्तोत्रं संपूर्णम् ॥ श्रीसांबसदाशिवार्पणमस्तु ॥